नं. ४९५७ — ४९५८ — ४९५९
क. ख. ग.

क. देवी कवच स्तोत्र व्याख्या.
ख. अर्गल स्तोत्र विवरणम्.
ग. कीलक विवरणं

कर्ता क. ख. ग. श्रीनारायणभट्टः

पत्र सं. १४ — सं. x

विषय: तन्त्रम्. एकस्मिन्नेव त्रीणि पुस्तकानि.

क देवीकवचस्तोत्रव्याख्या ९

ख अर्गलस्तोत्रविवरणम् ३

ग कीलकविवरणम् २

४९५७ — ४९५९

4957 - 4959

14

Complete

इति टीका रामाश्रमाचार्यकृता।

ॐ नमः श्रीगणाधिपतये ॥ श्रीदुर्गाभगवत्यै नमः ॥ नमः सकलकल्याणभाजनाय पिनाकिने नमो लक्ष्मीनिवासाय दे-
वतायै गिरां नमः ममाहमिति कथ्यंते मोहिता यस्य मायया दुर्ज्ञेया यासुरैः सर्वैस्तं वंदे कमलापतिं २॥ श्रीकृष्णकृपया देवी
विद्यारूपेण भासते कृपयापरमेशस्य विद्या सर्वजगन्मयी ३॥ क्वाहं मंदमतिः क्वायं समभाष्यागुणार्णवः तथापि हरि-
णादिष्टो गदिष्येर्थमणिर्णवं ४ गृहीतेर्थमहारत्ने शोधिते टीकिकाखनः हसंतु ज्ञे नाटदृष्ट्या मा हसंतु वराजनाः ५ अत्र सक-
ललोकहिताय यावती गौरी भगवान्नारदः श्रीनारायणकलया तद्धर्मपरायणश्च स्वनाम्ना प्रकटितपंचरात्रागमोपि वि-
स्मृता याचरितं ज्ञातुमिच्छन्संसारिणां सर्वजनानां सर्वाभीष्टावाप्तये ७ विद्याकृतक्लेशमोहदुःखादि संतरणाय ब्रह्माण-

श्रीनारद उवाच यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणां यन्न कस्यचिदाख्यातं तन्मे ब्रूहि पितामह १॥

मपृच्छत् तदेव दर्शयति यद्गुह्यमिति हे पितामह ब्रह्मन्मे मह्यं तद्ब्रूहि कथय ननु किं तद्गुह्यं ब्रवीमि यद्गुह्यं गोप्यं
अत्र लोके भुवने जने यथानर्हेभ्यः अनधिकारिभ्योल्पप्रज्ञालुब्धाश्रमेत्र यं कमपि श्रावयंति स्वयमसंयमिनो ज्ञानप्र-
भावा मंत्रपाठिनो हीनां कुर्वंतीति यत्कस्यचिन्नाख्यातं परममत्युत्कृष्टं परात्युत्कृष्टा मा लक्ष्मीर्जनानां यस्मात्तत्परमं प-
राणां कलत्राणां मा लक्ष्मीर्यस्माद्वा परेषां शत्रूणां मा लक्ष्मीर्यस्मात्प्राप्यत इति शेषः परः शत्रुकलत्रयोरिति विश्वः
यद्वा परममेव चित्स्वरूपमेव एतदेवादिकरणमित्यर्थः यस्माद्वराणां दृष्टयादीनां सर्वरक्षाकरं सर्वेभ्यः सत्वादि-
भ्यो रक्षां करोतीति तत् केषां नृणां मनुष्याणां न तत्सर्वकस्यचिन्नाख्यातं न कथितं तन्मे ब्रूहीति प्रश्नः तत्र ब्रह्माधिकारि-

णं सिद्धिसंयोग्यं वक्तव्यं ऽतिगोप्यमपि नारदायाह अस्तीति १ हे विप्र वेदार्थज्ञान नारद तद्गुह्यतममतिगोप्यमस्ति व
र्तते हे महात्मने तच्छृणुष्व किं तद्गोप्यतममस्ति यदेतावत्कालपर्यंतं न कस्यचिदाख्यातमतिवीर्यवत्तरं देव्या विश्वमायायाः
कवचं यथा गात्रे कवचधारिणो जनस्य शस्त्रास्त्रकृतं घातादिकं न भवति तथा देव्या बीजनामादिकवचधारिणः कृतवि
श्वासभक्तस्य शस्त्रास्त्रभूतप्रेतपिशाचसंग्रामचौरादि सर्वदुःखस्य रक्षाकरमेतत्कवचं सर्वभूतोपकारकं सर्वेषां भूतानां
जीवानामुपकारं करोतीति तत् पठनेन श्रवणेन वा सर्वाभीष्टकर्त्तारो विद्वंतीति भावः पुनः कथंभूतं पुण्यं पापविघ्नं इहलो

श्रीब्रह्मोवाच॥ अस्ति गुह्यतमं विप्र सर्वभूतोपकारकं
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महात्मने २॥

के कृतपापस्य नाशकं परलोके सुखप्रदं मनोहरं वा हे महात्मने नारद नारं नर दुष्टपापसमुदायं द्यति कलहेन खंड
यति इति नारदः तेषां बहुजीवने पापसमुदायाच्चिरकालनरकवासं दूरीकरोति कृपया साधूनामुपदेशद्वारा मोक्षमार्गं
नयति यतो महात्मा सर्वोपकारी मुनिश्च मननशीलस्तस्मात् उक्तं हे महात्मन् महांश्चासौ मुनिश्चेति तस्मादौ प्रोक्तस्ववह्निहृद
यं देव्या बीजरूपाणि अष्टनामान्याद्येव कथयति पश्चाद्देव्याः कवचं तस्मादौ नामान्येव दर्शयति प्रथममिति
द्वाभ्यां २॥

दे॰ बी॰ क॰ २

प्रथममाद्यं नाम पोलउज्जीति पोलस्य हिमाचलस्य उज्जी सा मेनाया उत्पन्नत्वात् तदुक्तं भागवते एवं दाक्षायणी हित्वा सती
पूर्वकलेवरं जज्ञे हिमवतः क्षेत्रे मेनायामिति शुश्रुमः इति प्रथमं नाम बीजं पोलउज्जीति १ द्वितीयं ब्रह्मचारिणी ब्रह्म त
पश्चर्यया चरति जानातीति यद्वा ब्रह्म तत्त्वं चरति जानातीति चर गति भक्षणयोरित्यस्य गत्यर्थस्य धातोर्ज्ञानार्थत्वात् स
र्वे गत्यर्था ज्ञानार्था अपीत्युक्तत्वात् वेदस्तत्त्वं तपो ब्रह्मेत्यमरः अथवा ब्रह्म विष्णुः सदाजितः पूर्णकामत्वात् तत्र चरति ग
च्छतीति ब्रह्मचारिणी वैष्णवी शक्तिः यद्वा रुद्रस्तार्थं हुकाररवया धृत ब्रह्मचारिवेषत्वाद् ब्रह्मचारी हरस्तस्येयं शक्तिः
तदुक्तं भागवते त्वं च भस्म करिष्यामि उपायेनापि दानवं त्वया भयं न कर्तव्यमस्मान्मे निर्भये जिरे अस्तु कामगतो विष्णु

2

प्रथमं पोलउज्जीति द्वितीयं ब्रह्मचारिणी तृतीयं चंडघंटेति कूष्मांडेति चतुर्थकं ३॥

र्वेद्रू नामसमन्वितः हूराप्यस्तुदियाञ्ज्वा वटुको योगमाययेति वटुकस्य ब्रह्मचारिणः श्रीहरस्य शक्तिर्ब्रह्मचारिणी
ति द्वितीयं नाम बीजं २ तृतीयं नाम चंडघंटा चंडा संतकोपना घंटा यस्या दस्ते दैत्यत्रासायेति सा चंडस्तत्यंतकोपन
इत्यमरः यद्वा चंडं चंडारूं घंटा टयति हिनस्तीति सा चंडघंटा हिंसे इति कविकल्पद्रुमकामधेनुटीकायां चंडघंटेति तृतीयं
३ चतुर्थं नाम कूष्मांडा कुः पृथिवी तस्याः ऊष्मा तपो यस्मात् जीवानामुत्पत्तिरेवंभूतं अंडं ब्रह्मांडं यस्याः सा यद्वा कुः कु
त्सिता ऊष्मा आध्यात्मिकादितापो यस्मिंस्तदेवंभूतमंडं यस्याः सा कुः पृथिवी समाख्याता कुशब्दः कुत्सितेऽपि च त्रे
काक्षरनाममालायां उष्मा ऊष्मागमस्तपः इत्यमरः कूष्मांडेति चतुर्थं नाम बीजं ॥४॥ ३॥

२

पंचमं नाम स्कंदमाता स्कंदति शत्रून् शोषयतीति स्कंदः कार्तिकेयस्तस्य माता स्कंदमातेति पंचमं नामबीजं ५ षष्ठं नाम
कात्यायनी कत्ययनानि मार्गाः संति यस्याः सः एषो रणादिना साधुतं यद्वा के स्वर्गे भवाः कात्या देवास्तान् अयति गच्छति रक्षार्थ
मिति कात्यायनी अय गतौ कात्यायनीति षष्ठं नामबीजं ६ सप्तमं कालरात्री कालाभया मायया सौ रात्रिश्च सा आर्षत्वाद्दीर्घत्वं
यद्वा कालं मृत्युं राति ददातीति कालरात्रिः यद्वा कालरात्रेर्मृत्योस्त्रायति रक्षति स्वभक्तान् ज्ञानदानेनेति कालरात्रिरिति सप्तमं बीजं
७ अष्टमं नाम महागौरी गौरवर्णत्वाद्गौरी यद्वा गच्छते विवाहार्थं शिवं उद्यमं गच्छतीति गौरी गुरौ उद्यमे तदुक्तं भागवते तमेव
दयितं भूयश्चाद्य केपतिमंबिका अनन्यभावैकगतिं शक्तिः सतीव पूरुषं इत्यष्टमं नामबीजं महागौरी ८ ननु देव्या अष्टौ ना

पंचमं स्कंदमातेति षष्ठं कात्यायनीति च सप्तमं कालरात्रेति महागौरीति चाष्टमं ४ उक्तान्येतानि नामानि ब्रह्मणै
व महात्मने अग्निना दह्यमानस्तु शत्रुमध्यगतो रणे ५ विषमे दुर्गमे चैव भयार्ताः शरणं गताः न तेषां जायते किंचि
दशुभं रणसंकटे ६॥

मानि केनोक्तानि तत्राह उक्तानीति द्वाभ्यां एतानि सर्वोक्तान्यष्टौ नामानि ब्रह्मणा कथितानि
कस्मै महात्मने महति कुले आत्मा मनो यस्य तस्मै नारदायेति शेषः महात्मनेति पाठांतरे महात्मनेति ब्रह्मविशेषणं एवा
र्थः स्पष्टतर एव शौनकं प्रति सूतवाक्यमपि बीजानि नारदायाह अष्टौ ब्रह्मा महात्मने सप्तमानि महादेव्या भक्त्या विशेषतो
चिन्तयति एतेषां नाम्नां मध्ये यो किंचिन्नाम येऽशरणं गतास्तेषां किं फलमित्याह येऽशरणं गतास्त एव आश्रयं शमास्तेषामशुभम
मंगलं न जायते न प्रादुर्भवति मंगलमेव भवतीत्यर्थः न तु कदाशुभं न जायते तत्राह रणसंकटे रणे संग्रामे यत्संकटं क
ष्टं तस्मिन् न तु केवलं नामाश्रयं गतास्तत्राह अग्निना दह्यमानाः संतः पुनर्ये रणे संग्रामे शत्रुमध्ये गताः पुनर्विषमे विषम
स्थाने गताः पुनर्दुर्गमे स्थाने गता भयार्ता भयेन पीडितास्तेषां शरणं गतानां मंगलं भवत्येव ६॥

दे॰
वी॰ क॰
३

ननु यैर्देव्यः स्मृता भक्त्या हृत्वा कथं पश्यंतीत्याह नापदमिति येनापन्ने न आपन्मा सा ये त्वाः सर्वोक्ताः शैलपुत्र्यादयः स्मृता
स्तस्यापदं न पश्यंति आपदं दूरीकुर्वंतीत्यर्थः तपुनर्नूनं निश्चितं सर्वदुःखक्षयंकरी यतस्तामपि पकापियैः स्मृतास्तेषां वृद्धिः
प्रकृष्टा जायते इति तस्येति तेक मेलिपक्षी वा आपत्त्रामस्यापदे नाशयंति स्मरणकर्तृश्च वृद्धिं प्रयच्छंतीत्यर्थः अत एताः शै
लपुत्र्यादयो श्लोकवचस्याद्देवेव स्वकामावामयस्मरणीयाः नपश्यंति नाशयंतीति निजभावप्रापर्वा तस्य भक्तस्यापदं वि
नाशय किं पश्यति न ॰ इदानीं चामुंडाद्याः सप्तमातृः सवाहना भक्ताभयाय पाशुनाशाय च निर्दिशति प्रेतसंस्थेति द्वाभ्यां शा
र्वीयाः सप्तमातरः शार्वी रुद्राष्टमो यासां ताः शार्वीयाः यद्वा शार्वस्य रुद्रस्येयं शक्तिः शार्वी सैवाद्या मुख्या यासां ताः जीवभावप्र

नापदं तस्य पश्यंति शोकदुःखक्षयंकरी येस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजायते ॰ प्रेतसंस्था तु चामुं
डा वाराही महिषासना ऐंद्री गजसमारूढा वैष्णवी गरुडासना ८ माहेश्वरी वृषारूढा कौमारी शिखि
वाहना ब्राह्मी हंससमारूढा शार्वीयाश्चैव मातरः ९॥

र्थः तापवद्दर्शयति चंडमुंडे हतवती चामुंडा तच्चरि
तमग्रे वक्ष्यति कथंभूता चामुंडा प्रेतसंस्था प्रेते मृतके संतिष्ठतीति सा १ वराहस्येयं शक्तिर्वाराही महिष एवा
सनं वाहनं यस्याः सा महिषासना २ ऐंद्री इंद्रस्य शक्तिर्गजे समारूढा ऐरावणाश्रिता ३ विष्णोरियं वैष्णवी शक्तिः
गरुड एवासनं यस्याः ४ महेश्वरस्य रुद्रस्येयं शक्तिर्माहेश्वरी वृषारूढा वृषभाश्रिता सा ५ कौमारी कुमारस्य
कार्तिकस्येयं शक्तिः शिखिवाहना शिखी मयूर एव वाहनं यस्याः सा ६ ब्रह्मण इयं शक्तिर्ब्राह्मी हंससमारूढा
हंसहयाश्रिता ॰ ॥९ इदानीं मातृणामाभरणानि आयुधानि चाह सर्वाभरणेति द्वाभ्याम् ॥

३

सर्वेषां समस्तानां मुकुटादीनामाभरणानां या शोभा तयाभितः आढ्याः युक्ताः अतिशयनिर्भरास्ताः नानारत्नैरनेकमणिभिरुप
शोभितास्ताः रथमारूढा रथस्थिताः क्रोधेन समाकुला व्याप्ताः शं सुखं भवनस्य वदारयति खं खनति शत्रूणामिति शंखः य
द्वा शं सुखं खनति ददाति स्वनेन स्वपक्षाणामिति शंखः खनु अवदारणे खनु दाने चक्रामति निक्षिप्यते शत्रूनिति चक्रं
गदति रुजति शत्रूनिति गदा शक्नोति शत्रून् हंतुं समर्था भवतीति शक्तिः हलति विदारयति शत्रूनिति हलं हल विलेखने
मुष्यते खंड्यते शत्रुरनेनेति मुशलं तच्च तदायुधं च मुशलायुधं मुश खंडने खे आकाशे अटति गच्छति शत्रोः रक्षार्थमिति खेट
कं तोलयति शत्रून् दंडं तेन गृह्णातीति तोमरं अयोग्रः काष्ठदंडः शस्त्रविशेषः तवरेति भाषया प्रसिद्धः परान् शत्रून् शृणा

सर्वाभरणशोभाढ्या नानारत्नोपशोभिताः दृश्यंते रथमारूढा देव्यः क्रोधसमाकुलाः १० शंखं चक्रं गदां शक्तिं
हलं च मुशलायुधं खेटकं तोमरं चैव परशुं पाशमेव च ११ कुंतायुधं त्रिशूलं च शार्ङ्गमायुधमुत्तमं दैत्यानां देह
नाशाय भक्तानामभयाय च १२ धारयंत्यायुधानीत्थं देवानां च हिताय वै १३॥

ति हिनस्तीति परशुः पश हिंसायां पाश
यति बध्नाति शत्रूननेनेति पाशः पाश बंधने ११ कृणति शत्रून् करोति शत्रुवेदने इति कुंतः स चासावायुधं तत् अल्पतोमर
शस्त्रविशेषायुधं कुंतेत्याकर्षणशस्त्रं त्रयः शूला यस्मिन्निति त्रिशूलं शूल रोगे शोगतनूकरणे वा शृंगाभ्यां निर्मितं शा
र्ङ्गं धनुः देव्यः एतान्यायुधानि धारयंति अयमनेन प्रकारेण ननु किमर्थं धारयंति तत्राह दैत्यानां देहनाशार्थमायुधा
नि धारयंति भक्तानामभयदानार्थं चेत्यमायुधानि धारयंति (भक्तानामभयदानार्थं चेत्यम) हितायाभिलषितफला
वाप्तये भक्तानां देवतानां चेति संबंधः ता देव्यो रक्षार्थं प्रार्थनीया इति देवी संबोधयन्त्यार्थयेदिति दर्शयन्नाह १३॥

दे॰
क॰ दी॰
४

महाबलेइति महद्बलं यस्याः सा महाबला तत्संबुद्धौ हे महाबले महान्कायो यस्याः सा तत्संबुद्धौ सर्वव्यन्महाकाये महद्भ
यं विनाशयितुं शीलमस्या महाभयविनाशिनी तत्संबुद्धौ हे महाभयविनाशिनी दीव्यति क्रीडतीति द्योतते रोचते सर्वत्रेति
देवीइति प्रोक्ता तत्संबुद्धौ हे देवि दुःखेन बहुतपश्चर्यादि कृच्छ्रेण प्रेक्ष्यते, वल्लोक्यते सद्भक्तैरिति दुष्प्रेक्ष्या तत्संबोधने हे दुष्प्रे
क्ष्ये शत्रूणां विपक्षाणां भयं वर्धयतीति भयवर्धिनी तत्संबोधने हे भयवर्धिनि दुर्गे त्वमेता दृशगुणोपेता मामुपासकं
त्राहि पालयेति सर्वमात्मरक्षां संप्रार्थ्यानंतरं दिक्षु रक्षामाह प्राच्यामित्यादि १४ प्राच्यां सर्वस्यां दिशैंद्री शक्तिर्मां र॰

महाबले महाकाये महाभयविनाशिनि त्राहि मां देवि दुष्प्रेक्ष्ये शत्रूणां भयवर्धिनि १४ प्राच्यां रक्षतु मामैंद्री
आग्नेय्यामग्निदेवता दक्षिणस्यां तु वाराही नैर्ऋत्यां खड्गधारिणी १५ प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवा
हिनी उदीच्यां चैव कौमारी ईशान्यां शूलधारिणी १६ ऊर्ध्वं ब्रह्माणि मे रक्षेदधस्ताद्वैष्णवी तथा एवं दशादि

शो मे रक्षेच्चामुंडा शववाहना ॥

क्षतु आग्नेय्यामग्निदिशि मामग्निदे वता रक्षत्विति शेषः दक्षिणस्यां वा
राही वाराहशक्तिः रक्षतु खड्गधारिणी नैर्ऋत्यां दिशि रक्षतु १५ वारुणी वरुणशक्तिः प्रतीच्यां पश्चिमायां दिशि
रक्षेद्रक्षतु शार्ङ्गिणि विधिविधिसंभावनास्वर्थेषु विधौ वा लिङ् मृगवाहिनी वायव्यां दिशि रक्षेत् कौमारी स्कंदशक्तिः उदी
च्यामुत्तरस्यां दिशि शूलधारिणी रुद्रशक्तिरीशान्यां दिशि रक्षत्विति शेषः १६ ब्रह्माणी ब्रह्मशक्तिरूर्ध्वमुपरिभागे
मे मम रक्षतु ब्रह्माणी मे रक्षेदिति पाठे सप्तमी येत्यन्ते दीर्घत्वमार्षं तथा तेन प्रकारेण वैष्णवी विष्णुशक्तिरधस्तादधःस्था
ने रक्षतु अव्ययत्वात्सार्वविभक्तिकत्वं एवमनेन पूर्वोक्तप्रकारेण चामुंडा शववाहना दशदिशः प्रतिरक्षतु १७ ॥

४

एवं दशदिक्षु रक्षार्थं देवीं संप्रार्थ्य दशनी चक्रभागेषु समीपे देवीः स्थापयितुं प्रार्थयति तत्र केषां विदेवी हृदये स्थितेति बुद्धिस्तेषां
रक्षार्थमाह जयेत्यादिना जयति विसृत्य यस्याः प्रसादादिति जया सा मे मम आग्रतो ग्रभागे स्यात् तिष्ठतु स्यादिति प्रयोग श्चार्थः मे
मम पृष्ठतः पृष्ठभागे विजया स्यात् विशेषेण जयति यस्याः प्रसादादिति विजया तथा न केनापि जिता अजिता वामपार्श्वे वा
मभागे स्यात् न कदाचित् पराजयो भंगो जातो यस्याः सा तु तदपराजिता सा दक्षिणभागे रक्षतु १८ एवं देवीसमीपे स्थातुं लो
केनैकेन संप्रार्थ्य दशनी निजांगरक्षार्थं देव्या नामभिः शिखाप्रभृतिष्वंगेषु कवचं करोति शिखामित्यादिना उद्योतयति प्र
काशयति लोकान्समग्रैश्वर्येणेत्युद्योतनी शिखां रक्षतु शिखां हृदुं प्रवर्तिरक्षति भक्तानित्युमा यद्वा उमेति सन्नादिनि

जया मे चाग्रतः स्यात् विजया स्यात्तु पृष्ठतः अजिता वामपार्श्वे तु दक्षिणे चापराजिता १८ शिखामुद्योतनी रक्षेदुमा
मूर्ध्नि व्यवस्थिता मालाधरी ललाटे च भ्रुवौ रक्षेद्यशस्विनी १९ त्रिनेत्रा च भ्रुवोर्मध्यं यमघण्टा च नासिके शंखि
नी चक्षुषोर्मध्ये श्रोत्रयोर्द्वारवासिनी २०॥

षेपकत्वात् यद्वा उमेति सत्त्वं मातिमानयति पतिवेनेत्युमा उकारः
शंकरः प्रोक्तस्तस्य कान्ता नाम मालाया मा उमाने उमा मूर्ध्नि मस्तके व्यवस्थिता मालां धरति मालाधरी मुंड
मालां संग्रामे हतानामिति शेषः सा ललाटे स्थिता भवत्विति शेषः यशो विद्यते यस्याः सा यशस्विनी भ्रुवौ भ्रूद्
वयं रक्षेद्रक्षतु १९ त्रीणि नेत्राणि यस्याः सा त्रिनेत्रा भ्रुवोर्मध्ये रक्षतु नासिके यमघण्टा रक्षतु यम नियमने शंखवत्
स्यास्तीति शंखिनी चक्षुषोर्नेत्रयोर्मध्ये रक्षतु द्वारे राजद्वारे वासो विद्यते यस्याः सा द्वारवासिनी रक्षतु श्रोत्रयोः
कर्णयोर्द्वयोर्मध्यवासश्चेति शेषः २०॥



दे॰
क॰ टी॰
५

कलयति पीडयति दैत्यानिति कालिका यद्वा कलयति भेदयति मनांसीति कपोलौ गण्डौ कलु संख्याने मनो:
कल्लते पं॰ त्वक् कराम्भसि कोशो इत्यस्य शक्तिः कर्णमूले रक्षतु कर्णयोर्मूले कर्णमूलं तत्र
घ्राणमनो वा गन्धः प्रसिद्ध इति सुगन्धा नासिका रक्षतु चर्च्यते स्तूयते या सा चर्चिका उत्तरोष्ठे
उत्तर उपरिस्थ ओष्ठः सा तत्र रक्षतु उत्तरोष्ठे जने ॥२१॥ कला षोडशो भागः इत्यमरः अमृतस्य कला षोडशो
भागो यस्याः सा अमृतकला यद्वा अमृतं कलयति गणयति संख्यापयति भक्तपालनार्थमित्यमृतकला सा

कपोलौ कालिका रक्षेत्कर्णमूले तु शांकरी नासिकायां सुगन्धा च उत्तरोष्ठे च चर्चिका २१ अधरे चामृत
कला जिह्वायां च सरस्वती दन्तान् रक्षतु कौमारी कण्ठदेशे तु चण्डिका २२ घण्टिकां चित्रघण्टा च महामाया
च तालुके कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमंगला ॥२३॥

अधरे अधरोष्ठे रक्षतु सरः प्रसरणं विद्यते यस्याः सा सरस्वती जिह्वायां रक्षतु कौमारी कौमारयति दैत्यजनानिति कौमारी
समस्यन्तपदे अलुक्समासः यद्वा कुमारस्य कार्तिकेयस्येयं शक्तिः दन्तान् रक्षतु रदना दशना दन्ता इत्यमरः चण्डयति
कुप्यति दैत्यानिति चण्डिका कण्ठदेशे कण्ठस्थाने रक्षतु चण्डिका कण्ठमध्ये इति पाठः २२ चित्रा अद्भुता घण्टा यस्याः
सा चित्रघण्टा घण्टिकां गलशुण्डिकां रक्षतु इति प्रोक्षः मीयते जनैरिति माया महती चासौ माया चेति महामाया सा
तालुके रक्षतु कामानि कमनीयान्यक्षाणीन्द्रियाणि यस्याः यद्वा कामाय अक्षाणि यस्याः सा कामाक्षी चिबुकं
अधरादधोदेशं रक्षतु अथ वाचमिति द्विषे वाग्गे कर्षचके व्यवहारे कलिद्रुमे इत्यमरः सर्वेषां मंगलं कल्याणं यस्याः सा सर्व

भद्रं कल्याणं कलयति प्रेरयति भक्तेष्विति भद्रकाली यद्वा भद्रा चासौ काली श्यामा चेति सा ग्रीवायां शिरोधरायां रक्ष-
तु धनुर्धरतीति धनुर्धरी पृष्ठवंशं रक्षतु नीला श्यामा ग्रीवा यस्याः सा नीलग्रीवा बहिःकंठे रक्षतु कंठे वाससे बहिःकंठे नल-
कूवरस्य कुवेरपुत्रस्येयं शक्तिः नलकूवरी णित्वाभाव आर्षः सा नालिकां कंठनाडीसमुदायं रक्षत्विति शेषः २४ खड्गं
धरतीति खड्गधारिणी उभौ स्कंधौ रक्षतु मे मम बाहू वज्रधारिणी रक्षतु दंडोस्यास्तीति दंडिनी हस्तौ करौ दंडोस्त्री लगुडे
पि स्यादित्यमरः अंबते कुनयति सर्वमित्यंबिका यद्वा अंबति गच्छति जानाति सर्वमित्यंबिका अंगुलीश्च रक्षतु अंब वग-
तौ गत्यर्थस्य धातोर्ज्ञानार्थत्वात् २५ स्खलस्य स्खलाख्यपाशस्येश्वरी स्वामिनी नखान् रक्षतु नलो वंशः सदृशो हृदा विशे- ॥ दे

ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी नीलग्रीवा बहिःकंठे नालिकां नलकूवरी २४ खड्गधारिण्युभौ स्कंधौ बाहू
मे वज्रधारिणी हस्तौ मे दंडिनी रक्षेदंबिका चांगुलीश्च २५ नखाञ्छूलेश्वरी रक्षेत्कक्षौ रक्षेन्नलेश्वरी स्तनौ र-
क्षेन्महादेवी मनःशोकविनाशिनी २६ हृदये ललितादेवी उदरे शुक्लवासिनी नाभिं तु कामिनी रक्षेद्गुह्यं गुह्ये- शिवकव

षस्तस्येश्वरी स्वामिनी नलेश्वरी यद्वा नलः नलोऽग्निस्तस्येश्वरी नलेश्वरी कक्षौ रक्षतु अग्नाकाराभाव आर्षः बाहुमूले कक्षे-
कक्षौ इत्यमरः महती चासौ देवी महादेवी स्तनौ कुचौ रक्षतु शोकं विनाशयति भक्तानामिति शोकविनाशिनी मनो रक्ष-
तु २६ ललति विलसति संसारे इति ललिता देवी हृदये रक्षतु शुक्ले विशदे वस्त्रे वस्ते आच्छादयतीति शुक्लवासिनी य- ॥ २
द्वा शुक्ले स्वच्छे ज्ञानोज्ज्वले वसतीति शुक्लवासिनी उदरे उदरविषये रक्षतु कामोऽभिलाषो विद्यते यस्या भक्तरक्षायामिति का-
मिनी यद्वा कमति दीव्यति प्रकाशते लोके इति कामिनी नाभिं रक्षतु गुह्यं गुह्येन्द्रियं तस्येश्वरी स्वामिनी भगस्येश्वरी भगं रक्षत्विति छ

दे॰ क॰ टी॰ ९

भूतानां नाथा भूतनाथा मेढ्रं शिश्नं रक्षतु महिषं वोढुं शीलं यस्याः सा महिषवाहिनी गुह्यदेशं [illegible] रक्षतु भग
मैश्वर्यादिषट्कं विद्यते यस्याः सा भगवती उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति
स्त्रीलिङ्गत्वाद्भगवती ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः वैराग्यस्याथ मोक्षस्य षण्णां भग इतीरणा [illegible] सा भगवती
कट्यां कटिदेशे रक्षतु मेघं वोढुं शीलं यस्याः सा मेघवाहिनी ऊरू ऊरुप्रदेशौ मे मम रक्षतु जानुभ्यां विन्ध्यवासिनीति
पाठान्तरे विन्ध्याचले वसितुं शीलं यस्याः सा जानुभ्यां जानुनी रक्षतु सर्वकामप्रदायिनी २८ महद्बलं यस्याः सा महाबला
जंघे रक्षतु विघ्नं नयति प्रापयति नीतिमार्गं जनानिति विनायकी यद्वा वीनां पक्षिणां नायको गरुड उक्तस्येयं प्रा

6

भूतनाथा च मेढ्रं मे गुह्यं महिषवाहिनी कट्यां भगवती रक्षेदूरू मे मेघवाहिनी २८ जंघे महाबला रक्षेज्जानुम-
ध्ये विनायकी गुल्फयोर्नारसिंही च पादपृष्ठे तु तैजसी २९ पादाङ्गुलीः श्रीधरी च पादौ च स्थलवासिनी नखा-
न्दंष्ट्राकराली च केशांश्चैवोर्ध्वकेशिनी ३०॥

क्ति विनायको गणेशस्तस्येयं विनायकी गणेशसंबंधिनी शक्तिर्जानुमध्ये
रक्षतु [illegible] भावः प्रायः नरसिंहस्येयं शक्तिर्नारसिंही सा गुल्फयो रक्षतु विशेषः तेजयति प्रकाशयति [illegible] इति
तेजो विद्यते तस्येयं शक्तिस्तैजसी पादपृष्ठे पादयोः पृष्ठे रक्षतु २९ श्रियं शोभां धारयति निजाङ्गे इति श्रीधरी पादा-
ङ्गुलीः पादयोरङ्गुलयस्ता रक्षतु स्थले वसितुं शीलं यस्याः सा स्थलवासिनी पादौ चरणौ रक्षतु पादयोः स्थलवासिनी
ति पाठः दंष्ट्राभिः कराली भयानका यद्वा दंष्ट्राभिः करैः [illegible] इति दंष्ट्राकराली [illegible] नखान्
रक्षतु ऊर्ध्वं केशा विद्यन्ते यस्याः सा ऊर्ध्वकेशिनी यद्वा ऊर्ध्वं [illegible] समीपे शीलं यस्याः सा ऊर्ध्वकेशि

९

कौमारी रोमकूपेषु रक्षतु कौमार्या अर्थः प्रागुक्तः तथा तेन प्रकारेण वागीश्वरी वाचामीश्वरी त्वचमंगचर्म रक्षतु पर्वाणि पाषाणग्रंथयस्ते संति यस्मिन्स पर्वतो हिमाचलस्तस्य पुत्री पार्वती रक्तं च मज्जा च वसा च मांसं च तत् रक्तमज्जावसामांसं दृढेकं अस्थीनि च मेदांसि च तान्यस्थिमेदांसि पार्वती रक्षतु ३१ कालरात्र्या निरुक्तिः पूर्वमुक्ता सांत्राणि रक्षतु मुकुटस्येश्वरी मुकुटेश्वरी यद्वा मुकुटेनेश्वरी स्वामिनी पित्तं धातुविशेषं रक्षतु पद्मं कमलं विद्यते यस्याः सा पद्मावती सर्वपदं दीर्घं आर्षः यद्वा पद्मा लक्ष्मी विद्यते यस्याः सा पद्मकोशो हृदयकमलभांडारे रक्षतु चूडायां शिखायां मणिर्मणिवत्सर्वोपरि विराजमा-

रोमकूपेषु कौमारी त्वचं वागीश्वरी तथा रक्तमज्जावसामांसमस्थिमेदांसि पार्वती ३१ अंत्राणि कालरात्री च पित्तं च
मुकुटेश्वरी पद्मावती पद्मकोशे कफे चूडामणिस्तथा ३२ ज्वालामुखी नखज्वालमभेद्या सर्वसंधिषु शुक्रं
रक्षतु ब्रह्माणी छायां छत्रेश्वरी तथा ३३ अहंकारं मनो बुद्धिं धर्मं च धर्मचारिणी प्राणापानौ तथा व्यानं स-
मानोदानमेव च ३४ ॥

ना कफे कफविकारे रक्षतु ३२ ज्वाला शिखा ज्वालामुखे यस्याः सा ज्वालामुखी नखानां नाडिकानां जालः समूहस्तं रक्षतु न भिद्यते भेदकैः शस्त्रादिभिरित्यभेद्या सर्वसंधिषु सर्वे समस्ता ये ते संधयस्तु शरीरस्य ते तेषु शुक्रं बीजं ब्रह्माणी रक्षतु तथा तेन प्रकारेण छत्रमातपत्रं तस्य तेन वेश्वरी छत्रेश्वरी छायां रक्षतु छायां देहप्रतिबिंबं यद्वा छायां कांतिमनातपं छाया सूर्यप्रिया कांतिः प्रतिबिंबमनातपः इत्यमरः ३३ धर्मं पुण्यं चरितुमाचरितुं शीलं वा यस्याः सा धर्मचारिणी वरगति भक्तयोः धर्मशाहेन चित्तं अहंकारः करणं वर्तते धर्मचारिणी रक्षतु हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः उदानः कंठदेशे स्याद्व्यानः सर्वशरीरगः ३४ ॥

दे॰
क॰ टी॰
८

वज्रं हस्ते यस्याः सा वज्रहस्ता यामानां कल्पो विधिः तं स्वशोभनं तदुत्संहं दं मे मे रक्षतु योतयति प्रकाशयति योतिनी रसरूपा-
दिकं रक्षतु नारं जीवसमूहं रक्षणायनमाश्रयो यस्य तद्दृनारा आपश्च वायनमाश्रयो यस्य सत्वे सत्वनारायणस्तस्येयं पा-
लिनी नारायणी आपो नारा इति प्रोक्ता आपो वै नरसूनवः अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः सत्वं सत्वगुणं प्रतिरजो-
रजोगुणं मूर्ति तमस्तमोगुणं प्रति मां रक्षत्विति शेषः सदा सर्वदा सर्वकाले वा वाराह्यानि हशक्तिः एवोक्ता देवाराहि त्वं मे
मम आयुर्जीवितकालं रक्ष वैष्णवी विष्णुशक्तिर्धर्मं रक्षतु ३६ चक्रमस्या अस्तीति चक्रिणी तयया आदीनां प्रशंसां यशो दाना-

वज्रहस्ता च मे रक्षेद्याम्यां कल्पं सुशोभनं रसं रूपं च गन्धं च शब्दं स्पर्शं च योगिनी ३५ सत्वं रजस्तमश्चैव रक्षेन्नारायणी
सदा आयुर्मे रक्षतु वाराही धर्मं रक्षतु वैष्णवी ३६ यशः कीर्तिं च लक्ष्मीं च सदा रक्षतु वैभवं चक्रिणी ऐन्द्री गोत्रं च मे रक्षेत्
पशून्मे रक्ष चण्डिके ३७ पुत्रान्रक्षेन्महादेवी भार्यां रक्षतु भैरवी पन्थानं विपथा रक्षेन्मार्गं क्षेमकरी तथा राजद्वारे
महालक्ष्मीर्विजया सर्वतः स्थिता रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु तत्सर्वं रक्ष मे देवी जयन्ती पापनाशिनी

दीनां प्रशंसां कीर्तिं लक्ष्मीं संपदं सदा सर्वदा रक्षतु ऐन्द्री इन्द्रशक्तिः मे मम गोत्रं कुलं रक्षेद्रक्षतु पशून् तथा हे चण्डिके त्वं रक्ष ३७
महती वा सा मा महादेवी पुत्रान् रक्षेत् बिभ्यति दैत्यजना यस्याः सा भैरवी भैरवो रुद्रस्तस्येयं शक्तिर्वा भैरवी भार्यां पाणिगृहीतां स्त्रि-
यं रक्षतु पन्थानं साधुपथिकसेवितमार्गं विपथं असन्मार्गं द्विजनसेवितं मार्गं वा क्षेमकरी रक्षेत् ३८ महती वा सा लक्ष्मीश्च
महालक्ष्मी राजद्वारे रक्षतु विशेषेण जयति शत्रूनिति विजया सर्वतः सर्वस्मादुपद्रवादिभ्यः स्थिता स्थिरा ३९ तु शुनये रक्षाहीनं
तं स्थानं भवति कवचेन च वर्जितं स्यात् तत्स्थानं सर्वं पापनाशिनी जयन्ती रक्षतां रक्षतामिति प्रयोगः आर्षः शुभार्थं कवचस्य नित्य

इदानीं सर्वत्र रक्षार्थं दुर्गां संबोध्य प्रार्थयते रक्षेति हे दुर्गे मे मम सर्वगात्राण्यनुक्तानि रक्ष कथंभूतासि दुर्गापहारिणी दुर्ग
मपहरतीति दुर्गापहारिणी तत्संबुद्धौ हे दुर्गापहारिणि अस्य प्रत्यक्षतया निर्दिशति यतस्त्वमेवंभूता अतस्त्वमेव सर्वगात्रा
ण्युक्तान्यनुक्तानि रक्षेत्यर्थः ४९ सर्वकामानामेव कवचधारणं निर्दिशन्नाह पदमिति यद्यात्मनः स्वस्य शुभं मंगलमिच्छे
त् इच्छेत्तर्हि कवचेनानावृतः पदमेकमपि न गच्छेत् कवचेनावृतः कृतरक्षो यत्र यत्र हि निश्चयेन गच्छति तत्र तत्र सर्वा
न् कामानवाप्नोति इति कवचधारणादिति शेषः अर्थलाभे धनलाभः निश्चितं च विजयः सर्वाः कामिकाः कामनाय

रक्ष मे सर्वगात्राणि दुर्गे दुर्गापहारिणि ४९ पदमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः ५० कवचेनावृतो नि
त्यं यत्र यत्रैव गच्छति तत्र तत्रार्थलाभश्च विजयः सर्वकामिकः ५१ यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितं
परमैश्वर्यमतुलं प्राप्नोति विपुलं पुमान् ५२ निर्भयो जायते मर्त्यः संग्रामेष्वपराजितः त्रैलोक्ये च भवेत्पूज्यः
कवचेनावृतः पुमान् ५३ इदं तु देव्याः कवचं देवानामपि दुर्लभं यः पठेत्प्रयतो नित्यं त्रिसंध्यं श्रद्धयान्वितः ॥

स्मिन्नेवंभूतो विजयः प्राप्यते इत्यादि फलसिद्धये कवचधारणमिति शेषः ५० यं यं कामं मनोवांछितं चिंतयते तं तं नि
श्चितं प्राप्नोति अतुलमसममपि विपुलं बहुलमैश्वर्यं प्राप्नोति ननु भूतले एवमैश्वर्यादिकं प्राप्नोति परं निर्भयो न स्यात्तत्रा
ह निर्भय इत्यादि ५२ निर्भयो भयरहितो मर्त्यो मनुष्यो जायते संग्रामेषु परैः शत्रुभिर्जितो न भवति ननु तर्हि पूज्यो न स्यात्
आह त्रयाणां लोकानां समाहारस्त्रैलोक्यं तस्मिन्पुमान्पूज्यो भवति यतः कवचेनावृतः ननु तर्हि देवीकवचं सुलभं
स्यात्तत्राह (त्रयाणां लोका) इदमिति ५३ इदं देव्याः कवचं देवानामिंद्रादीनामपि दुर्लभमसुलभं यो भाग्यवशात्प्राप्य आस्तिका

दे॰
क॰ टी॰
८

दैवीति देवानामियं दैवी कला तस्य भवति सा कुतो जायते तत्राह यतस्त्रैलोक्येऽपराजितः ननु तस्य देवीकवचस्य पाठकः कति वर्षाणि जीवेत्तत्राह जीवेदित्यादि साग्रं समग्रं संपूर्णं वर्षशतं जीवेत्प्राणान्धारयेत् कथंभूतः सञ्जीवेत्तत्राह अपमृत्युविवर्जितः अपमृत्युना परमायुरतिरिक्तविपरीतमरणेन वर्जितो रहितः जलसर्पादिभिस्तस्य मरणं न स्यादित्यर्थः ननु यदि रोगैर्व्याप्तो भवेत्तर्हि किं बहुवर्षजीवनेन तत्राह नश्यंतीति ४५ सर्वे सकला व्याधयो रोगा नश्यंति तत्राह लूतेत्यादि लूनंति छिंदति शरीरत्वचमिति लूताः लूञ् छेदने विस्फोटकोऽरक्तविकारविशेषस्तदादिर्येषां ननु विस्फोटकादयो यदि नश्यंति तर्हि नश्यंतु विषं न नश्यत् तत्राह यत्स्थावरं वृक्षलतागुल्माद्युद्भवं जंगमं सर्पादिदंशोद्भवं कृत्रिमं मद्विकेन तैलाद्युद्भवं यत्तत्सर्वमेवं ज्ञातीयं विषं नश्यति ४६

दैवी कला भवेत्तस्य त्रैलोक्ये चापराजितः जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः ४५ नश्यंति व्याधयः सर्वे
लूताविस्फोटकादयः स्थावरं जंगमं चैव कृत्रिमं चापि यद्विषं ४६ अभिचाराणि सर्वाणि मंत्रयंत्राणि भूतले
भूचराः खेचराश्चैव कुलजाश्चोपदेशिकाः सहजा कुलजा माला डाकिनी शाकिनी तथा ४७॥

भूतले पृथिवीतले सर्वाण्यभिचारकृतानि शत्रुभिर्विहितानि मंत्रयंत्राणि नश्यंति न केवलमेतदेव नश्यंति किं त्वन्येऽपीत्याशयेनाह भूचरा इत्यादि भुवि चरंति गच्छंति भक्षयंति वा भूचराः चरगतिभक्षणयोः खेऽआकाशे चरंति गच्छंति भक्षयंति वा खेचराः कुले जायंते इति कुलजाः उपदेशे भवा उपदेशिकाः सहजायंत इति सहजाः अकुले जायंत इत्यकुलजाः सहजाश्च ते अकुलजाश्चेति सहजाकुलजाः माल्यंते धार्यंत इति मालाः तदाकारः मलमलरूपभूतो भभेरवं भयानकं डः खे वियत्येव यस्याः सा डाकिनी पक्षे हृदद्धनौ वेद्मंडले डः डकारो व्यसने पिचेति विश्वः डकारो भैरवे प्रोक्तो डकारो व्यसने पिच डकारः खरस्त्रास्यात्तस्करे वाप्युदाहृतः इत्येकाक्षरः यः शक्नोति समर्थो भवति जनान्हंतुमिति शाकिनी इत्यादयोऽपि न नश्यंति किं वान्येऽपीत्या

अंतरिक्षेत्यादि अंतरिक्षे चरंति गच्छंति भक्षयंति वांतरिक्षचराः घुरयंति भीषयंति जनानिति घोराश्च घुर भीमार्थशब्दयोः
शाशास्तदित्वकं डरवं विद्यते यस्या लोकार्थमित्या शाकिनी कथंभूता महद्बलं वीर्यं यस्याः सा गृह्णंति लोकांश्छलेनेति ग्रहाः
भवंति नानारूपेण जने षिति भूताः पिशं मांसमं चयंति संचयंत्यभ्यवहारार्थमिति पिशाचाः अंजुगति पूजनयोः यक्षापि
शितं मांसमश्नाति भुंजते इति पिशाचाः पृषोदरादीनि यथोपदिष्टमित्यत्र पृषोदरादित्वात्सिद्धं यक्षंते दसंति भक्षयंति वा
जनानिति यक्षाः यक्ष भक्षदहनयोः गां गानं धारयंतीति वा गंधर्वाः रक्षंति यत्नेभ्य इति राक्षसाः रक्षपालने ते च ते च
ते चेति पश्चात्कर्मधारयः ४९ ब्रह्मणपपते वा ब्रह्मणा श्यामी राक्षसाः वा विकल्पे नैते कबुरवर्ण मांसमं ततोलांति गृह्णं

अंतरिक्षचरा घोरा शाकिनी च महाबला ग्रहभूतपिशाचाश्च यक्षगंधर्वराक्षसाः ४९ ब्रह्मराक्षसवेताः
लाः कूष्मांडा भैरवादयः नश्यंति दर्शनात्तस्य कवचे हृदि संस्थिते ५० मानोन्नतिर्भवेद्राज्ञां तेजोवृद्धिकरं
(परं यशसा वर्धते सोपि कीर्तिमंडितभूतले ५१॥

तीति वेतालाः चित्रकर्बुरक ल्माषशबलैताश्च कर्बुरे इत्यमरः
ते च ते ते चेति ब्रह्मराक्षसवेतालाः कोशस्थित्यां कूष्मायस्मादेवंभूतमंडं बीजं येषां ते कूष्मांडाः कूष्मांडफलाकार
सदृशा वा नश्यंते कदा नश्यंतीत्याह कवचे देवीकवचे हृदये संस्थिते सति ५० राज्ञा भूपतिना कारणेन मानोन्नति
र्भवेत् तेजसः परं वृद्धिकरं कवचधारीयशसा वर्द्धते वृद्धो भवति वृध् यङ् वृद्धौ यद्वा सकवचधारी यशसा परं शत्रुं वर्ध
ते छिनत्ति तेशति दीयते वा वर्धङ् पूर्तिछिदोः राज्ञामिति पाठे राज्ञां नृपाणां मध्ये मानोन्नतिर्भवति मानेनाहंका
रेणोन्नतिः ऊर्द्ध कीर्तिमंडितभूतले कीर्त्या मंडितं च तद्भूतलं च तस्मिन् ५१॥

दे·
क· टी·
५

त्रुत्वा, दैवकवचं कृत्वा चंडीं देवीं जपेत् कां चंडीमित्याह सप्तशतीं सप्तशतानि श्लोका मार्कंडेयपुराणोक्ता यस्यास्तां न
वनत्तापकस्य कियत्कालपर्यंतं फलं भवेत्तत्राह यावदिति यावत्कूर्मः कच्छपदेवो धरां भूमिं धत्ते धरति कथंभूतां सशैल
वनकाननां शैलाः पर्वताश्च वनानि जलानि च काननानि विपिनानि च तथा तैः सह वर्त्तते इति तथा तां जीवनं भुवनं वन
मित्यमरः तावन्मेदिन्यां पृथिव्यां तस्य संततिस्तिष्ठति पुत्रपौत्रकी पुत्राणां पौत्राणां चेयं पुत्रपौत्रकी ननु ज्ञापकः कवच
पाठको वा देहान्ते किं प्राप्नोति तत्राह देहान्ते इति ५२ सुरैर्देवैरपि दुर्लभं दुष्प्रापं तत्स्थानं परमं परात्सु तत्परं श्रीमालक्ष्मीर्यस्मिंस्तद्

१

जपेत्सप्तशतीं चंडीं कृत्वा तु कवचं पुरा यावत्कूर्मो धरां धत्ते सशैलवनकाननां तावत्तिष्ठति मेदिन्यां सन्त
तिः पुत्रपौत्रकी ५२ देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभं प्राप्नोति पुरुषो नित्यं महामायाप्रसादतः ५२
इति श्रीब्रह्मोक्तं देवीकवचस्तोत्रं संपूर्णम् ॥

ॐ तमित्यर्थः तदुक्तं भा गवते वैकुंठः कल्पितो येन लोको लो
कनमस्कृतः रमया प्रार्थ्यमानेन देव्या तद्धितकाम्यया कस्मात्तत्राह महामायाप्रसादतो महामायायाः प्रसाद
त् प्रसादस्तु प्रसन्नतेत्यमरः हरिभुवनदाम्नपूपः प्रसादस्तस्मात् यथामतिस्तथा देवीकवचार्थं हृदकविः प्रा
र्थयेन्मतिमान्धीरस्तत्पदावामयेशुचिः १ देपार्वतिमहामाये विस्तोर्नामसहस्रके रतिमैर्भाषितं भूपायणाते
यनपायिनी २॥ इति श्रीनारायणभट्टविरचिता देवीकवचस्तोत्रटीका संपूर्णेति शुभं भूयात् ॥

ॐ नमश्चिद्भरसंदर्भे ॥ ॐ यशोदानंदिनी यस्य भगिनी प्रोच्यते बुधैः तत्कृपापातेन त्वादावर्गलाविहृतिं ब्रुवे १ महा
मायाप्रसादतइति परमस्थानप्राप्तिश्रवणान्महामायामेव तन्नामभिः स्मरन्नमस्करोति जयंतीत्यादिना जयत्युत्कर्षे
णावर्ततइतिजयंती मग्यतेगम्यतेभक्तैरितिमंगला मगिगतौ अतआह यतोभद्रकाली भद्रं कल्याणं कलयति सृज
ति भक्तानामिति तदपि कुतस्तत्राह यतः कपालिनी कं स्वर्गं पालयितुं शीलं यस्याः सा कपालिनी दुःखेन गम्यते प्राप्य
ते त्रायते वा जनैरिति दुर्गा तत्पर्यस्य ज्ञानार्थत्वात् क्षमते भक्तानामपराधमिति क्षमा पृथिवीरूपेत्यर्थः शमयति भक्त
पापमिति शिवा शमनतेः शिवादेशः दधाति विश्वमुदरे इति धात्री सुष्टुछोभनं यस्याः सा स्वाहा हूयते जनैर्यज्ञाग्नाविति

ॐ जयंती मंगला काली भद्रकाली कपालिनी दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते १ मधुकैटभ-
विद्रावविधातृवरदे नमः रूपं देहि जयं देहि यशो देहि द्विषो जहि २॥

स्वाहा स्वेआत्मनि

दधाति जनैः श्राद्धे दत्तमि-
ति स्वधा यत एवंभूतासि अतस्तुभ्यं नमोऽस्तु भवतु १ मधुश्च कैटभश्च तयोर्विद्रावो रणे पलायनं तेन विधात्रे
ब्रह्मणे वरं ददातीति रणात्पलायनं कारयतीति तत्संबोधने हे मधुकैटभविद्रावविधातृवरदे तुभ्यं नमः देवीं नत्वा-
किं प्रार्थयेत्तत्राह रूपमित्यादि रूपं सौंदर्यं जयं यतः कुतश्चित्पराजयाभावं यशः सार्वत्रिकीं तपोदानादिप्रशंसा रूपां व
कीर्तिं देहि प्रयच्छ मह्यमुपासकायेति शेषः अत्र यशःकीर्त्योरवांतरविशेषो नाश्रितः अतिप्रबलपापुसङ्गावे किं रू
पादिप्राप्त्याप्रयोजनमिति तत्राह द्विषः पापरूपान् जहि नाशयेति ॥ २॥

महिषासुरस्य दैत्यविशेषस्य निर्णाशो वधस्तेन विधात्रे ब्रह्मणे सुखं ददातीति हे महिषासुरनिर्णाशविधातृसुखदे य
द्वा महिषासुरस्य निर्णाशं विदधाति करोतीति महिषासुरनिर्णाशविधात्री अत एव जगत्त्रयस्य सुखदा सा चासौ सा चेति
पश्चात्कर्मधारयः तस्या आमंत्रणं पूर्ववत् हे देवि तुभ्यं नमः ३ रक्तं रुधिरमेव बीजं उत्पत्तिकारणं यस्य स रक्तबीजोऽसु
रविशेषस्तस्य वधो नाशो यस्यास्तत्संबोधने हे रक्तबीजवधे चंडश्च मुंडश्च तौ विनाशयतीति तत्संबोधने हे चंडमुंडवि
नाशिनि ते तुभ्यं नमः ४ निशुंभश्च शुंभश्च तयोर्निर्णाशः तेन विधात्रे ब्रह्मणे वरान्मनोरथान्ददातीति तत्संबुद्धौ हे नि

महिषासुरनिर्णाशविधातृसुखदे नमः रूपं दे· ३ रक्तबीजवधे देवि चंडमुंडविनाशिनि रूपं देहि· ४ नि
शुंभशुंभनिर्णाशविधातृवरदे नमः रूपं देहि· ५ अचिंत्यरूपचरिते सर्वशत्रुविनाशिनि रूपं देहि· ६
वंदितांघ्रियुगे देवि देवसौभाग्यदायिनी रूपं देहि· ७ नतेभ्यः सर्वदा भक्त्या चंडिके दुरितापहे रूपं देहि· ८॥

शुंभशुंभनिर्णाशविधातृवरदे यद्वा निशुंभशुंभनिर्णाशविधात्री चासौ वरदा चेति कर्मधारयः तस्या आमंत्रणे एतादृ
शि हे देवि तुभ्यं नमः ५ अचिंत्यान्यतर्क्याणि चरितानि च यस्याः सा सर्वाञ्छत्रून्विनाशयति भक्तनिमित्तं तत्संबोधनं
सर्वं पूर्ववत् ६ वंदितं स्तुतमभिवादितं वांघ्रियुगं चरणद्वयं यस्यास्तत्संबोधने हे वंदितांघ्रियुगे देवानां सौभाग्यं
शोभनमैश्वर्यं ददातीति तत्संबोधने हे देवसौभाग्यदायिनि ७ हे चंडिके दुरितानि पापान्यपहरंतीति तत्संबोधने हे
दुरितापहे केभ्यः सर्वदा नतेभ्यः प्रणतेभ्यः प्रणतानां जनानां षष्ठ्यर्थे चतुर्थी ८॥

देवि चंडिके व्याधिं नाशयतीति व्याधिनाशिनी तत्संबुद्धौ व्याधिनाशिनि केभ्यः इत्याह भक्तिपूर्वं यथा स्यात्तथा त्वां स्तुवद्भ्यः
स्तुवतां भक्तानामित्यर्थः षष्ठ्यर्थे चतुर्थी ९ हे चंडिके देवि नरा इह अस्मिन्संसारे भक्तितो भक्त्या ये त्वामर्चयंति पूजयंति तेषां रू
पमित्यादि देहीत्यन्वयः यत्तदोर्नित्यसंबंधात् १० सुष्ठु शोभनं चेदं भगं च तस्य भावः सौभाग्यं भगं श्रीकाममाहात्म्य
वीर्ययत्नार्ककीर्तिष्वित्यमरः न विद्यते रोगो यस्य सो रोगः तस्य भावश्चारोग्यं परमत्युत्कृष्टं सुखमानंदं देहि ११ हे देवि
द्योतनात्मिके कल्याणं विधेहि कुरु विपुलां बहुलां श्रियं लक्ष्मीं च विधेहि कुरु १२ सुराणामसुराणां च शिरोरत्नैर्मुकु

स्तुवद्भ्यो भक्तिपूर्वं त्वां चंडिके व्याधिनाशिनि रूपं० ९ चंडिके सततं ये त्वामर्चयंतीह भक्तितः रूपं देहि० १०
देहि सौभाग्यमारोग्यं देहि देवि परं सुखं रूपं ११ विधेहि देवि कल्याणं विधेहि विपुलां श्रियं रूपं १२
सुरासुरशिरोरत्ननिघृष्टचरणेंबिके रूपं १३ विद्यावंतं यशस्वंतं लक्ष्मीवंतं जनं कुरु रूपं देहि १४॥
प्रचंडदैत्यदर्पघ्ने चंडिके प्रणताय मे रूपं १५ चतुर्वक्त्रैश्चतुर्वक्त्रसंस्तुते परमेश्वरि रूपं देहि १६॥
कृष्णेन संस्तुते देवि शश्वद्भक्त्या सदाम्बिके रूपं० १७॥

टमणिभिर्निघृष्टौ चरणौ य स्यास्तत्संबोधने हे अंबिके
रूपमित्यादि १३ विद्या विद्यते यस्मिन्स विद्यावान् तं यशो विद्यते यस्य स यशोवांस्तं लक्ष्मीर्विद्यते यस्य स लक्ष्मीवांस्तं लक्ष्मी
वंतं जनं कुरु भक्तलोकं १४ प्रचंडमत्यंतकोपनायै दैत्यास्तेषां दर्पं गर्वं घ्नंतीति तत्संबोधने हे प्रचंडदैत्यदर्पघ्ने दे
वि प्रणताय मेमसं रूपमित्यादि देहि १५ चत्वारि वक्त्राणि मुखानि यस्य तेन चतुर्वक्त्रेण ब्रह्मणा संस्तुते परमा चा
सावीश्वरी च तत्संबोधने हे देवि रूपमित्यादि देहि १६ हे देव्यंबिके सदा सर्वदा कृष्णेन शश्वद्भक्त्या स्वकार्यार्थं

दे० स्तो० टी० ११

संस्तुते तदुक्तं भागवते अर्चयिष्यंति मनुष्यास्त्वां सर्वकामवरेश्वरीं धूपोपहारबलिभिः सर्वकामफलप्रदामिति रू
पमित्यादि प्रार्थना १७ नकेवलं कुलेनैव स्तुता यावद्रुद्रादिभिरपीत्याह हिमाचलेत्यादि हिमाचलस्य सुता पार्वती
तस्या नाथो रुद्रस्तेन संस्तुता तत्संबोधने हे परमेश्वरि रूपमित्यादि १८ इंद्राण्याः पुलोमजायाः पत्युः पतिर्भर्ता शक्र
स्तेन कर्त्रा सद्भावेन करणेन पूजिता तत्संबोधने हे रूपमित्यादि १९ हे देवि प्रचंडा दोर्दंडा आयेषां ते यामी दैत्याश्च तेषां द
र्पं गर्वं विनाशयितुं शीलं यस्यास्तत्संबोधने हे प्रचंडदोर्दंडदैत्यदर्पविनाशिनि रूपमित्यादि देहि २० हे देवि भक्तजना

हिमाचलसुतानाथसंपूजिते परमेश्वरि रूपं देहि १८ इंद्राणीपतिसद्भावसंपूजिते परमेश्वरि रूपं देहि १९॥
देवि प्रचंडदोर्दंडदैत्यदर्पविनाशिनि रूपं देहि २० देवि भक्तजनोद्दामदत्तानंदोदयेंऽबिके रूपं देहि २१॥
पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीं तारिणीं दुर्गसंसारसागरस्य कुलोद्भवां २२॥

नां भक्तजनेभ्यो दत्तश्चानंदस्य उदयो यया सा भक्तजनोद्दामदत्तानंदोदया सा चासावंबिका चेति कर्मधारयः तत्संबुद्धौ
हे दुर्गे रूपमित्यादि देहि २१ पत्नीं भार्यां मनोरमां सुंदरीं मनसो वृत्तं चरित्रं मनोवृत्तं तदनुसर्तुं शीलं यस्यास्तां मनोवृत्तानु
सारिणीमिति पाठांतरे मनोवित् मनोज्ञानं तस्य भावो मनोवित्ता तामनुसर्तुं शीलं यस्यास्तां स्वगतौ गत्यर्थ
स्य धातोर्ज्ञानार्थत्वात् तारिणीं तारयति पातिव्रत्यधर्मेण पतिं तत्कुलं च पितृकुलं च तया तां कस्य तारिणीं दुर्गसंसा
रसागरस्य कुलोद्भवां दुर्गश्चासौ संसारसागरस्तस्य तारिणीं कुले सत्कुले सद्वंशे उद्भव उत्पत्तिर्यस्यास्तां सत्कुलोद्भवां प

दे० ... ११

नन्वेतदर्गलाख्यं स्तोत्रं पठित्वा किं पठेत्तत्राह इदमिति नरो जन इदमर्गलाख्यं स्तोत्रमादौ पठित्वा तु पुनः महा स्तोत्रं सप्तशतीसंख्यां सप्तशातिकाख्यं देवीस्तोत्रं पठेत् श्लोकानां सप्तशती संख्या यस्य तत् श्लोकसप्तशतीसंख्यं श्लोकसप्तशतसंख्यमिति पाठांतरे ह्रस्वत्वमार्षं यद्वा श्लोकसप्तशतसंख्यमिति पाठः तत्र सप्तशतानि संख्या यस्य तत् तत् सर्वपदे अलुक्समासश्चार्षः ननु पाठकः किं लभेत्तत्राह वरं श्रेष्ठं संपदः वरं प्राप्नोति वरं मनोरथं वा २२ व्याख्यातं

इदं स्तोत्रं पठित्वा तु महास्तोत्रं पठेन्नरः सप्तसप्तशतीसंख्यं
वरमाप्नोति मानवः २२ इत्यर्गलस्तोत्रं संपूर्णम् ॥

हि मया स्तोत्रमर्गलाख्यं यथामति नत्वा देवीं विष्णुमायां प्रार्थये मोदवृत्तये १ ब्रह्मणा विष्णुना चैव शंभुना स्वार्थसिद्धये स्तुता शक्रादिभिर्देवैः ऋषिभिस्तत्त्वदर्शिभिः २ पुराणवेदसिद्धांततंत्रशास्त्रस्मृतिष्वागमैः श्रीकुलेश्वरणांभोजे भक्तिं मे संददातु सा ३ ॥ इति श्री अर्गलस्तोत्रविवरणं संपूर्णम् ॥

दे·
की·टी·
१२

ॐ नमस्त्रिपुरसुंदर्यै ॥ ॐ देवकीगर्भसंभूतायैकानंशाग्हरेः प्रिया तद्भ्रातरं हरिं नत्वा कीलकं विवृणोम्यहं १॥
तत्रादौ मुनिः सर्वविघ्नोपशांतिपूर्वकभुक्तिमुक्तिफलावाप्तये श्रीदेवीशक्तिमाहात्म्यं संस्तूयेदानीं शिवं नमस्करोति विशु
द्धेत्यादिना सोमार्धं चंद्रार्धं यस्य ललाटे शीतलमस्य स सोमार्धधारी शिवस्तस्मै नमः कथंभूताय विशुद्धं निर्मलं ज्ञा
नमध्यात्मलक्षणं यस्यैतादृशो देहः सकलशरीरं यस्य तस्मै विशुद्धज्ञानदेहाय त्रयाणां वेदानां समाहारस्त्रिवेदी
सैव दिव्यानि चक्षूंषि नेत्राणि यस्य तस्मै पुनः कथंभूताय श्रेयःप्राप्तनिमित्ताय श्रेयो मोक्षः प्राप्तिरिहलोके नायासे

12

विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे १ सर्वविघ्नविनाशन-
नं मंत्राणामपि कीलनं सोपि क्षेममवाप्नोति सततं जाप्यतत्परः २॥

न यत्नार्जनं यत उक्तं श्रीयाज्ञवल्क्येन हि वि
यं निःश्रेयसमैहिकं पारलौकिकं चेति श्रेयश्च प्राप्तिश्च श्रेयःप्राप्ती तयोर्निमित्तं कारणं यः श्रीमहारुद्रस्तस्मै नम
इति ननु कृतो रुद्राय नमस्कारस्तत्राह यतो रुद्र इदं सप्तशतसंज्ञं स्तोत्रं सर्वकार्यार्थे निमंत्रयामासेति पंचमेनान्वयः
१ सर्वेषां विघ्नानां विनाशाय यः श्रीमहारुद्रो मंत्राणां प्राकुत्साधितमंत्राणां कीलनं बंधनं कृतवान् सर्वविघ्नवि
नाशनेपि अपीति निश्चये एवंभूतं श्रीमहारुद्रं यो नमस्करोति स क्षेममवाप्नोति यः सततं निरंतरं जप्यतत्परः
सोपि क्षेमं कल्याणमवाप्नोति २ ननु जापकस्यैतावदेव फलं स्यात्किं वान्यदपीति तत्राह सिध्यंतीत्यादि २॥

एतेनसमग्रातसंख्येनस्तोत्रेणदेवीस्तवनंतुसांसकलानिवस्तूनिसिध्यंति सिद्धानिभवंति कानितानीत्याह उच्चाटना
दीनिस्वकृतानिसिध्यंति परकृतानिकीलितानिबद्धानिभवंतीत्यर्थः ३ एतत्समग्रातसंख्यंस्तोत्रंविनामंत्रऔषध
मन्यच्चयत्किंचित्कुभाशुभंतत्सर्वंनसिध्यति येनसमग्रातसंख्येनस्तोत्रेणसर्वमुच्चाटनादिसिध्यति अतःकीलक
पूर्वकंसमग्रातीपाठःकर्तव्यः ४ लोकेसंसारेइमांसमग्रांसंपूर्णांयांकामाल्लभिष्यंति प्रापयिष्यंति अपिसिद्ध्यं
तीतिपाठांतरेसिध्यंतिसिद्धाभवंति मंत्रादयोनेनेतिकृत्वाहरोरुद्रः सर्वंसमग्रमेवमनेनप्रकारेण इदंसमग्रातसं॰

सिद्ध्यंत्युच्चाटनादीनिवस्तूनिसकलान्यपि एतेनस्तुवतांनित्यंस्तोत्रपाठःप्रसिध्यति ३ नमंत्रोनौषधंतत्रनकिं॰
चिदपिसिध्यति विनेतत्सिध्यतेयेनसर्वमुच्चाटनादिकं ४ समग्रामाल्लभिष्यंतिलोकएकामिमांहरः कृत्वानिमंत्रया
मासमसर्वमेवविधंशुभं ५ स्तोत्रंवैचंडिकायास्तुतच्चगुप्तंचकारसः समाप्तोयंसपुण्येनतंयथावन्निमंत्रणं ६ सोपिदे
ममवाप्नोतिसर्वमेवनसंशयः कृष्णायांवाचतुर्दश्यांमष्टम्यांवासमाहितः ७॥

एवंस्तोत्रंशुभंमंगलका विनिमंत्रयामासशुभं
वावाचयामाससर्वकामार्थसिद्धयइतिशेषः ``` गुप्तीतदेवदर्शयतिस्तोत्रमित्यादिना सश्रीमहारुद्रस्तच्चंडिकायाःस्तो
त्रंगुप्तंगोप्यंचकार सोयंपाठकोजनःपुण्येनसमाप्तःसर्गोयथावन्निमंत्रणंजप्यादिकंकुर्यात्तंदेवीस्वर्गफलंकरोतीति य
स्तुपाठमात्रंकुर्यात्तस्यकिंफलंस्यादित्याह सोपीत्यादि ६ सपाठकःसर्वत्तेमंप्राप्नोति प्रकटोच्चारणादपिसपादःकदा
कार्यइत्याह कृष्णायामिति कृष्णायांवाशाक्लाशुक्लायामपिचतुर्दश्यांतथाष्टम्यामपि यतःसमाहितएकाग्रचित्तःदेय
यंयोददाति यःप्रतिगृह्णाति तस्यप्रयत्नवतःसिद्धिर्नान्यस्येत्याह ददातीत्यादि ७॥

दे·
की·टी·
१३
13

योगरूर्ददातियश्चस्त्रियःप्रतिगृह्णाति तयोर्दानप्रतिगृहीत्रोरेषादेवीसम्यक्तीप्रसिद्ध्यतिप्रसन्नाभवति अन्यथा
न्यतिथैयथाकथंचित्सिद्धिर्विनाग्रहणेमिथ्यानसिद्ध्यतीत्यर्थः तर्हिकथंसिद्धिमायातीत्यादेरमिति इत्थमनुनाशकारे
णरूपेणभेदेनकीलेनकीलनेनमहादेवेनश्रीकृष्णेनकीलितंबंधनंकृतमितियतोस्याःकीलकसर्वपाठात्सिद्धिःफ
लंच अतस्तदेवाह योनिष्कीलामित्यादि ८ यःशुभान्नित्यंसर्वदाशस्फुटंस्पष्टकंठंयथास्यात्तथैनांसमग्रपंतीजपति
मंत्रादिन्यासंकरोति सगंधर्वोगंधर्वदेवतावनेजायतेप्रादुर्भवति कथंजपतितदाह निष्कीलांकीलकरहितांपतां
विधाय श्रीदोकीलकपाठंकृतेत्यर्थः ननुवनेएकाकीयदिजायते तदाकिंप्रभुत्वमिति तत्राह ससिद्धःसिद्धजाति

ददातिप्रतिगृह्णातिनान्यथैषाप्रसिद्ध्यति इत्थंरूपेणकीलेनमहादेवेनकीलितं ८ योनिष्कीलांविधायैनां
नित्यंजपतिसस्फुटं ससिद्धःसगणःसोपिगंधर्वोजायतेवने ९ नचैवाप्यटतस्तस्यभयंक्वापिजायते ना
पमृत्युवशंयातिमृतोमोक्षमवाप्नुयात् १० ज्ञात्वाप्रारभ्यकुर्वीतह्यकुर्वाणोविनश्यति ततोज्ञात्वैवसंपन्ना
मिदंप्रारभ्यतेबुधैः ११

देवैःसहवर्ततेइतिसगणोगणैर्देवैःसंघैःसहवर्ततइतितथासः अस्यपाठकस्यफलांत(
माहपचाहनचैवेत्यादि ९ तस्यजापकस्ययत्रक्वाप्यटतोपिभयंनजायतेनप्रादुर्भवति किंचापमृत्युवशंना
याति अल्पायुर्नस्यात् अथमृतःसन्मोक्षंगतोभवेत् अतोविधिपूर्वमेवाध्यस्याग्रहणमित्यर्थः १० ज्ञात्वापूर्वोक्तफलेश्रुति
बहुधाप्रारभ्यकुर्वीत अस्याःपठनारंभं पाठादिकंयःकुर्यात् सनविनश्यति अकुर्वाणस्तुविनश्यति पाठादिकमकुर्वा
णोविनाशंदुःखंजन्ममरणादिकंचप्राप्नुयात् ततःसंपन्नांसंपूर्णांमादौज्ञात्वानंतरंप्रारभ्यतेबुधैःप्राज्ञैः ११

जने मनुष्ये ललनावत्तरत्ता सौभाग्यादि च यत्किंचिद्दृश्यते तत्सर्वं तत्प्रसादेन तस्याः प्रसादेन ततो हेतोरिदं समग्रस्तोत्रं जा
प्यं शुभं मंगलोत्पादकं सद्भिः सर्वदा कार्यं मंगलायनमद्भुतमित्युक्तत्वात् १२ अस्मिन्स्तोत्रे स्थानैरुच्चैर्वा जप्यमाने किं स्या
दित्याह स्थानैरित्यादि स्थानैर्मंदमंदमुच्चकै रतिप्रायेनास्मिन्स्तोत्रे जप्यमाने मतिः स्तोत्रैः स्तवनो जनस्य सं ... संपद्भवति
ततस्तस्मात्कारणात्तज्जाप्यं प्रारभ्यमारंभणीयमेव निश्चितं १३ तस्याः प्रसादेनैश्वर्यं विभूतिः सौभाग्यारोग्यसंपदः शत्रुहा
न्यश्च परो मोक्षो मुक्तिश्च भवति अतः सात्विकैः सत्त्वगुणोपेतैर्देवैर्जनैर्वा स्तूयते दुर्गेति शेषः ऐश्वर्यं तत्प्रसादेनेति पादे

सौभाग्यादि च यत्किंचिद्दृश्यते ललनाजने तत्सर्वं तत्प्रसादेन ततो जप्यमिदं शुभं १२ स्थानैस्तु जप्यमानेस्मिन्
स्तोत्रे संपत्तिरुच्चकैः भवत्येव समग्रापि ततः प्रारभ्यमेव हि १३ ऐश्वर्यं तत्प्रसादेन सौभाग्यारोग्यसंपदः श
त्रुहानिः परो मोक्षः स्तूयते सात्विकैर्जनैः १४ इति श्रीकीलकस्तोत्रं संपूर्णम् ॥ ॥

स्तूयते सा न किं जनैरिति च पाठे यस्याः दुर्गायाः प्रसादेन सर्वमैश्वर्यादि भवति सैवंभूता श्रीभवानी जनैर्भक्तैरितरलोकैः
किं न स्तूयते अपि तु स्तूयत एवेत्यर्थः इदानीं यथामति कीलकं विवृत्य टीकाकारः प्रार्थयते १४ त्वत्प्रसादान्महेशानि
देवि सर्वमैश्वर्यमस्तु वै मम भूयात्तदैश्वर्यं त्वत्पादाब्जसेवनात् १॥ इति श्रीभट्टनारायणविरचितं की
लकविवरणं सम्पूर्णम् ॥ ॥